# Семь драгоценностей царя-чакравартина

## Лалитавистара, глава 3 (отрывок)

## ललितविस्तरः

३ कुलपरिशुद्धिपरिवर्तस्तृतीयः।

parivarta *m* - вращение, промежуток времени, год, перемена; круговое движение; раздел книги;
pariśuddhi *f* - полное очищение, чистота; оправдание;

अथ शुद्धावासकायिका देवपुत्रा जम्बुद्वीपमागत्य दिव्यं वर्णमन्तर्धाप्य ब्राह्मणवेषेण ब्राह्मणान्वेदानध्यापयन्ति स्म।

śuddhāvāsa, śuddhāvāsakāyuka - боги Чистой обители, класс богов;
jambudvīpa *m* - центральный из семи континентов, окружающих гору Меру;
varṇa *m* - цвет, окраска; облик, внешний вид; варна, каста;
antar√dhā III U. (p.p. antarhita) - прятать;

यस्यैवरूपा गर्भावक्रान्तिर्भवति, स द्वात्रिंशता महापुरुषलक्षणैः समन्वागतो भवति।

evaṃrūpa (evaṃ-rūpa), *buddh.* evarūpa - такой, подобный;

यैः समन्वागतस्य द्वे गती भवतो न तृतीया।

सचेदगारमध्यावसति राजा भवति चक्रवर्ती चतुरङ्गो विजितवान् धार्मिको धर्मराजः सप्तरत्नसमन्वागतः।

sacet *buddh.* - если; иначе, или же, иным способом;
adhy-ā√vas I P. - жить, обитать;
cakravartin *m* - (*букв.* поворачивающий колесо) верховный царь, совершенный правитель;
caturaṅga - четырехчленный, о войске - полная армия, сост. из пехоты, конницы, слонов и колесниц;

तस्येमानि सप्त रत्नानि भवन्ति।

तद्यथा-चक्ररत्नं हस्तिरत्नं अश्वरत्नं स्त्रीरत्नं मणिरत्नं गृहपतिरत्नं परिणायकरत्नमेव सप्तमम्॥

gṛhapati *m* - домохозяин, глава семьи; *buddh.* казначей;

कथंरूपेण राजा चक्रवर्ती चक्ररत्नेन समन्वागतो भवति

इह राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य तदेव पोषधेयं च पञ्चदश्यां

शिरःस्नातस्योपवासोषितस्योपरिप्रासादतलगतस्य स्त्र्यागारपरिवृतस्य पूर्वस्यां दिशि दिव्यं चक्ररत्नं प्रादुर्भवति।

abhi√ṣic (abhi-√sic) VI P. помазать на царство, короновать; кропить водой, освящать;
poṣadheya *buddh.* - относящийся ко дню (u)poṣadha (skr. pauṣadha), праздничный день, который бывает четыре раза в месяц;
prāsāda *m* - дворец; терраса; верхний этаж высокого здания, большое каменное здание, храм;
stryāgāra (strī-āgara) *n, m* - гарем;
prādur √bhū I P. стать видимым, появиться, возникать;

सहस्रारं सनेमिकं सनाभिकं सुवर्णवर्णकर्मालंकृतं सप्ततालमुच्चैः समन्ताद् दृष्ट्वान्तःपुरं राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य तद्दिव्यं चक्ररत्नमेव भवति।

ara *m* - спица (колеса);
nemi *f* - обод колеса, круг, окружность;
nābhi *f, m* - пупок, углубление, центр;
tāla *m* - пальма, мера длины;
samantād *adv.* кругом, во все стороны, со всех сторон;
antaḥpura (antaḥ-pura) *n* - женская половина дома, гарем; царский дворец;

श्रुतं खलु मया यस्य किल राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य तदेव पोषधेयं पञ्चदश्यां शिरःस्नातस्योपवासोषितस्योपरिप्रासादतलगतस्य स्त्र्यागारपरिवृतस्य पूर्वस्यां दिशि दिव्यं चक्ररत्नं प्रादुर्भवति, स भवति राजा चक्रवर्ती।

नूनमहं राजा चक्रवर्ती यन्न्वहं दिव्यं चक्ररत्नं मीमांसयेयम्।

√man *des.* - обдумывать, исследовать, проверять, испытывать;

अथ राजा क्षत्रियो मूर्धाभिषिक्त एकांसमुत्तरासङ्गं कृत्वा दक्षिणजानुमण्डलं पृथिव्यां प्रतिष्ठाप्य दक्षिणेन पाणिना तद्दिव्यं चक्ररत्नं प्रार्थयेदेवं चावेदयेत्-प्रवर्तयस्व भट्ट दिव्यं चक्ररत्नं धर्मेण माधर्मेण।

aṃsa *m* - плечо;
uttarāsaṅga *m* - верхняя одежда;
ā√vid II P. *caus.* - извещать, предлагать;
bhaṭṭa *m* - почтенный господин;

अथ तद्दिव्यं चक्ररत्नं राज्ञा क्षत्रियेण मूर्धाभिषिक्तेन प्रवर्तितं सम्यगेवऋद्धौ विहायसा पूर्वेण व्रजति।

ṛddhi *f* - счастье, успех, удача, благополучие; *buddh.* сверхъестественная, магическая сила;

अन्वेति राजा चक्रवर्ती सार्धं चतुरङ्गेण बलकायेन।

balakāya *m buddh.* - войско, армия;

यत्र च पृथिवीप्रदेशे तद्दिव्यं चक्ररत्नं संतिष्ठते, तत्र राजा क्षत्रियो मूर्धाभिषिक्तो वासं कल्पयति सार्धं चतुरङ्गेण बलकायेन।

pradeśa *m* - место, область;
vāsa *m buddh.* - жилье, жилище;

अथ ये ते भवन्ति पूर्वस्यां दिशि राजानो मण्डलिनः

maṇḍalin *m buddh.* - правитель области, местный царь;

ते रूप्यपात्रीं वा सुवर्णचूर्णपरिपूर्णामादाय स्वर्णपात्रीं वा रूप्यचूर्णपरिपूर्णामादाय राजानं चक्रवर्तिनं प्रत्युत्तिष्ठन्ति

rūpya *n* - серебро, золотая или серебряная монета;
pātrī *f* - сосуд, блюдо, горшок;
cūrṇa - измельценный, раздробленный; *m n* мука, порошок; пыль;
svarṇa *n* - золото;
praty-ut√thā I U. - подниматься, вставать, идти навстречу;

एहि देव स्वागतं देवाय, इदं देवस्य राज्यमृद्धं च स्फीतं च क्षेमं च सुभिक्षं च रमणीयं चाकीर्णबहुजनमनुष्यं च।

sphīta - плодородный, обильный; возросший, расцветший; богатый, обильный
kṣema - приятный, уютный; спокойный, тихий, безопасный;

अध्यावसतु देव स्वकं विजितमनुप्राप्तम्।

adhy-ā√vas I P. - жить, обитать;
vijita - завоеванный; *buddh. n* государство, страна, подконтрольная территория;

एवमुक्ते राजा क्षत्रियो मूर्धाभिषिक्तस्त्राता तान् राज्ञो मण्डलिन एतदवोचत् कारयन्तु भवन्तः स्वकानि राज्यानि धर्मेण।

हन्त भवन्तो मा प्राणिनं घातयिष्यथ मादत्तादास्यथ मा कामेषु मिथ्या चरिष्यथ मा मृषा वक्ष्यथ यावन्मा मे विजिते अधर्ममुत्पद्यते माधर्मचारिणो रोचेथ।

hanta *ij.* - выражение привлечения внимания, поддержки, радости, печали;
mithyā *adv.* - ложно, обманным образом, неверно, напрасно;
mṛṣā *adv.* - напрасно, ложно, обманчиво;
√ruc I Ā. - блестеть; нравиться, казаться;

एवं खलु राजा क्षत्रियो मूर्धाभिषिक्तः पूर्वां दिशं विजयति।

पूर्वां दिशं विजितः पूर्वं समुद्रमवगाह्य पूर्वं समुद्रमवतरति।

पूर्वं समुद्रमवतीर्य सम्यगेव ऋद्ध्या विहायसा दक्षिणेन व्रजति।

अन्वेति राजा चक्रवर्ती सार्धं चतुरङ्गेण बलकायेन।

पूर्ववदेवं दक्षिणां दिशं विजयति।

यथा दक्षिणामेवं पश्चिमामुत्तरां दिशं विजयति।

उत्तरां दिशं विजित्य उत्तरसमुद्रमवगाहते।

अवगाह्योत्तरात्समुद्रात्प्रत्युत्तरति।

प्रत्युत्तीर्य सम्यगेव ऋद्ध्या विहायसा राजधानीमागत्योपरि अन्तःपुरद्वारेऽक्षतमेवास्थात्।

rājadhānī (rāja-dhānī) *f* - столица;

एवंरूपेण राजा क्षत्रियो मूर्धाभिषिक्तश्चक्ररत्नेन समन्वागतो भवति॥

कथंरूपेण राजा चक्रवर्ती हस्तिरत्नेन समन्वागतो भवति

इह राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य पूर्ववद्धस्तिरत्नमुत्पद्यते।

सर्वश्वेतं सप्ताङ्गसुप्रतिष्ठितं स्वर्णचूडकं स्वर्णध्वजं स्वर्णालंकारं हेमजालप्रतिच्छन्नं ऋद्धिमन्तं विहायसा गामिनं विकुर्वणाधर्मिणं यदुत बोधिर्नाम नागराजा।

supratiṣṭhita - твердо стоящий;
cūḍaka *n* - пучок волос на темени, хохолок; плюмаж, корона;
vikurvaṇā *f buddh.* - способность принимать разные формы;

यदा च राजा क्षत्रियो मूर्धाभिषिक्तस्तद्धस्तिरत्नं मीमांसितुकामो भवति

अथ सूर्यस्याभ्युद्गमनवेलायां तद्धस्तिरत्नमभिरुह्य इमामेव महापृथिवीं समुद्रपरिखां समुद्रपर्यन्तां समन्ततोऽन्वाहिण्ड्य राजधानीमागत्य प्रशासनरतिः प्रत्यनुभवति।

parikhā *f* (-parikha, *buddh.*) - ров с водой вокруг города; канава, препятствие;
paryanta *m* - граница, край, предел;
samantatas *adv.*- отовсюду, со всех сторон (+Gen.);
anv-ā√hiṇḍ I P. *buddh.*- странствовать, путешествовать;
praśāsana *n* - указание, руководство, управление, правило;
praty-anu√bhū I P. *buddh.*- испытывать, чувствовать, переносить;

एवंरूपेण राजा चक्रवर्ती हस्तिरत्नेन समन्वागतो भवति॥

कथंरूपेण राजा चक्रवर्ती अश्वरत्नेन समन्वागतो भवति

अथ राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य पूर्ववदश्वरत्नमुत्पद्यते।

सर्वनीलं कृष्णशिरसं मुञ्जकेशमादृतवदनं स्वर्णध्वजं स्वर्णालंकारं हेमजालप्रतिच्छन्नं ऋद्धिमन्तं विहायसा गामिनं विकुर्वणाधर्मिणं यदुत बालाहको नामाश्वराजम्।

muñja *m* - название растения *Saccharum Sara*, осока;
ādṛta - внимательный, рьяный, усердный;

यदा च राजा क्षत्रियो मूर्धाभिषिक्तोऽश्वरत्नं मीमांसितुकामो भवति

अथ सूर्यस्याभ्युद्गमनवेलायामश्वरत्नमभिरुह्य इमामेव महापृथ्वीं समुद्रपरिखां समुद्रपर्यन्तां समन्तन्तोऽन्वाहिण्ड्य राजधानीमागत्य प्रशासनरतिः प्रत्यनुभवति।

एवंरूपेण राजा चक्रवर्ती अश्वरत्नेन समन्वागतो भवति॥

कथंरूपेण राजा चक्रवर्ती मणिरत्नेन समन्वागतो भवति

इह राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य पूर्ववन्मणिरत्नमुत्पद्यते शुद्धनीलवैडूर्यमष्टांशं सुपरिकर्मकृतम्।

vaiḍūrya *m, n* - ляпис-лазурь, кошачий глаз;
aṣṭāṃśa (aṣṭa-aṃśa) *buddh.* - восьмигранный;

तस्य खलु पुनर्मणिरत्नस्याभया सर्वमन्तःपुरमवभास्येन स्फुटं भवति।

ābhā *f* - блеск, вид;
avabhāsa, avabhāsya *m* - блеск, сияние;
sphuṭa - ясный, открытый, расцветший;

यदा च राजा क्षत्रियो मूर्धाभिषिक्तस्तं मणिरत्नं मीमांसितुकामो भवति,

अथ रात्र्यामर्धरात्रसमयेऽन्धकारतमिस्रायां तं मणिरत्नं ध्वजाग्रे उच्छ्रापयित्वा उद्यानभूमिं निर्याति सुभूमिदर्शनाय।

tamisra - мрак, тьма; tamisrā *f* темная ночь;

तस्य खलु पुनर्मणिरत्नस्याभया सर्वावन्तं चतुरङ्गबलकायमवभासेन स्फुटीभवति सामन्तेन योजनम्।

sāmanta - находящийся со всех сторон, граничащий; *m* сосед, вассал;

ये खलु पुनस्तस्य मणिरत्नस्य सामन्तके मनुष्याः प्रतिवसन्ति

sāmantaka - находящийся рядом, соседний, граничащий с ч.-л.;

ते तेनावभासेनास्फुटसमाना अन्योन्यं संजानन्ति अन्योन्यं पश्यन्ति अन्योन्यमाहुः

samāna - похожий, сходный; равный, одинаковый, единый, согласный;

उत्तिष्ठ भद्रमुखाः कर्मान्तानि कारयत आपणानि प्रसारयत

bhadramukha - *употребляется в значении второго лица в N, V* sg. добрый господин, pl. добрые люди;
karmānta (karma-anta) *m* - окончание дела, завершение работы; дело, занятие;
pra√sar *caus.* - распространять, выставлять, открывать (широко);
āpaṇa *m* - рынок, торговля;

दिवा मन्यामहे सूर्यमभ्युद्गतम्।

एवंरूपेण राजा क्षत्रियो मूर्धाभिषिक्तो मणिरत्नेन समन्वागतो भवति॥

कथंरूपेण राजा चक्रवर्ती स्त्रीरत्नेन समन्वागतो भवति

इह राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य पूर्ववत्स्त्रीरत्नमुत्पद्यते।

सदृशी क्षत्रिया नातिदीर्घा नातिह्रस्वा नातिस्थूला नातिकृशा नातिगौरी नातिकृष्णा अभिरूपा प्रासादिका दर्शनीया।

abhirūpa - соразмерный, мудрый, прекрасный;
prāsādaka - грациозный, очаровательный;

तस्याः सर्वरोमकूपेभ्यश्चन्दनगन्धं प्रवाति मुखाच्चोत्पलगन्धं प्रवाति।

romakūpa (roma-kūpa) *m, n* - поры на коже;

काचिलिन्दिकसुखसंस्पर्शा।

kācilindika *n* - вид мягкой ткани;

शीतलकाले चास्या उष्णसंस्पर्शानि गात्राणि भवन्ति, उष्णकाले च शीतसंस्पर्शानि।

सा राजानं चक्रवर्तिनं मुक्त्वा नान्यस्मिन् मनसापि रागं करोति किं पुनः कायेन।

एवंरूपेण राजा चक्रवर्ती स्त्रीरत्नेन समन्वागतो भवति॥

कथंरूपेण राजा चक्रवर्ती गृहपतिरत्नेन समन्वागतो भवति

gṛhapati *m* - домохозяин, глава семьи; *buddh.* казначей;

इह राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य पूर्ववद् गृहपतिरत्नमुत्पद्यते पण्डितो व्यक्तो मेधावी दिव्यचक्षुः।

vyakta - мудрый, умный, ученый;
medhāvin - умный, мудрый, разумный, проницательный;

स तेन दिव्यचक्षुषा सामन्तेन योजनं सस्वामिकानि निधानानि पश्यति, अस्वामिकानि निधानानि पश्यति।

svāmika *m* - хозяин, владелец, господин (*обычно употребляется в сложных словах*);
nidhāna *n* - хранение, склад; клад, сокровище;

स यानि तानि भवन्ति अस्वामिकानि, तै राज्ञश्चक्रवर्तिनो धनेन करणीयं करोति।

एवंरूपेण राजा चक्रवर्ती गृहपतिरत्नेन समन्वागतो भवति॥

कथंरूपेण राजा चक्रवर्ती परिणायकरत्नेन समन्वागतो भवति

pariṇāyaka *m buddh.* - руководитель, министр, главнокомандующий;

इह राज्ञः क्षत्रियस्य मूर्धाषिभिक्तस्य पूर्ववत्परिणायकरत्नमुत्पद्यते पण्डितो व्यक्तो मेधावी।

राज्ञश्चक्रवर्तिनश्चिन्तितमात्रेण उद्योजयितव्यं सेनामुद्योजयति स्म।

ud√yuj *caus.* - побуждать, готовить;

एवंरूपेण राजा चक्रवर्ती परिणायकरत्नेन समन्वागतो भवति।

एभिः सप्तरत्नैः समन्वागतो भविष्यति।

भवति चास्य पुत्रसहस्रं शूराणां वीराणां वराङ्गरूपिणां परसैन्यप्रमर्दकानाम्।

varāṅga, varāṅgarūpin *buddh.* - имеющий совершенные части (тела);

स इमां महापृथिवीं ससागरपर्यन्तामखिलामकण्टकामदण्डेनाशस्त्रेणाभिनिर्जित्याध्यासयति।

akaṇṭaka - лишенный шипов, невраждебный;
adhy√ās (adhi√ās) II Ā. - занимать, садиться, владеть;

सचेदगारादनगारिकां प्रव्रजिष्यति, वान्तच्छन्दरागो नेता अनन्यदेवः शास्ता देवानां च मनुष्याणां चेति॥

anagārikā *f buddh.* - аскетическая жизнь, лишенная дома;
chanda *m* - желание, причуда, страсть, удовольствие; рвение, усердие, воля;
√vam (I P., p.p. vānta) - извергать, изрыгать, тошнить.